खड्गमालास्तोत्र

दुर्गास्तोत्रं

नं १२४२

5702 / 8

f- 8

complete

नं. ९५८२ क
खड्गमालास्तोत्र
टपकाती
...

ॐ श्रीगणेशायनमः ॐ ह्रेतवेजगतामेवसंसारार्णवसेतवे
प्रभवेसर्वविद्यानांशंभवेगुरवेनमः गणेशंभुवनेशंचवादिनींन
कुलींक्रमात् त्रिपुरांब्रह्ममंत्रंचशैवंपंचाक्षरंपठेत् षडक्षरंमंत्रप
क्षाद्रुद्राक्षींचसप्तकं नारायणंनवाणींचदशबीजान्नपूर्णकां ह
इंचभास्करंविष्णुंभुवनेशींततोवदेत् ततःपंचदशींविद्यांषो
डशींतदनंतरं सकृदुच्चरितांमालांमंत्रानेतान्वरानने पुरश्चर
णमेतेषांसकृत्पाठेनजायते स्वाभीष्टदेवताभिश्चजपमात्रेणजायते
ॐ अस्यमंत्रः ॐ ऐं क्लीं श्रीं ह्स्रैं ह्स्क्ल्रैं श्रीं ह्रीं ऐं समयिनि मदिरानंदसुंदरि
सकलसारस्वरंवंदिने श्रीं ह्रीं ऐं भुजंगभूपालमौलिमालार्चितचर
णकमलेविकटदंतघटाटोपाभिचारिणिमदीयंशरीरंरक्षरक्षपरमे
श्वरिहुंफट्स्वाहा ॐ भूःस्वाहा ॐ भुवःस्वाहा ॐ स्वःस्वाहा ॐ भूर्भुवः
स्वःस्वाहा नरान्त्रमालाभरणभूषितेमहाकौलिनि महाब्रह्मवादि
नि महाद्यनोन्मादकारिणि महाभोगप्रदे ब्रह्मसरीयंशरीरंवज्रमयं

१ कुरु कुरु दुर्जनान् हन हन महीपालान् क्षोभय क्षोभय परचक्रं भंजय
भंजय जयंकरि गगनगामिनि त्रैलोक्यस्वामिनि समलवरयूं रमलव
रयूं भमलवरयूं श्रीभैरवि प्रसीद प्रसीद स्वाहा इति व्याप्य। एषा वि।
द्या मया ख्याता समयाचारवर्तिनी अतिवीर्यतरा तीव्रा सूर्यकोटिसम
प्रभा कुलांगनाकुले सर्वं मदीयं परमेश्वरी देवी रत्नं दिव्यांगं दि
व्यांगभोगदायिनी रक्तरक्तमहादेवि शरीरं परमेश्वरि मदीयं मदिरा
नंदे आपादतलमस्तकं निरालंबे महानले लीयमाना स्वरेश्वरि
हूंकारं च ततः कृत्वा प्रजयेद् भूमिमंडलं एतां तेवामहस्तेन ह्रींका
रं त्रिगुणं जयेत् पश्चात्तैश्चरमन्त्राणां मूलमंत्रोपि शंकर मालामंत्रवि
धानेन क्रमेणोच्चारणं भवेत् पार्वत्युवाच भगवन्देवदेवेश सर्व
ज्ञ करुणानिधे शुद्धशक्तिमहामंत्रं ब्रूहि मे सकलेष्टदं ईश्वर उ०
शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि यस्य स्मरणमात्रेण च कु
र्याजाफलं लभेत् शुद्धाः न मीनाः स्वाहान्ता सर्वेषां नाजयान्तकाः
शुद्धायाः शक्तिमालाया जपानेन विधीयते ॥

ॐ श्री गणेशाय नमः ॥ श्री गुरुभ्यो नमः ॥ अथ [illegible]

अस्य श्री रुद्राशक्तिमालामंत्रस्य उपेंद्रियाधिष्ठा [illegible] आदित्य स्येयं

ऋषिः ॥ गायत्री छंदः सात्विर्क हंकार भट्टारिर्क पीठ स्थि

त कामेश्वरी [illegible] कनिलया कामेश्वरी [illegible] ललिता

ललिता महाभट्टारिका देवता ॥ ऐं बीजं ॥ ह्रीं शक्तिः श्रीं

सर्वाङ्गसिद्ध्यै कीलकं ॥ सर्वाभीष्ट सिध्यर्थे जपे विनियोगः ॥ ॐ ऐं श्रं अथ करन्यासः ऐं

गुष्ठाभ्यां नमः ॥ ह्रीं तर्जनीभ्यां नमः ॥ श्रीं मध्यमाभ्यां ॥

१

२
खड्ग०

श्रीं अनामिकाभ्यां०॥ क्लीं कनिष्ठिकाभ्यां०॥ ऐं करतल
करपृष्ठाभ्यां नमः॥ ओं ऐं हृदयाय नमः॥ ह्रीं शिरसे स्वाहा॥
श्रीं [illegible] शिखायै वषट्॥ श्रीं कवचाय हुं॥ क्लीं नेत्रत्रया
य वौषट्॥ ऐं अस्त्राय फट्॥ अथ ध्यानम्॥ अरुणां करुणां
तरंगिताक्षीं धृतपाशांकुश पुष्पबाण चापां अणिमा
दिभिरावृतां मयूखैरहमित्येव विभावये भवानीं॥१॥

ताद्दशी खड्गमाप्नोतियेनहस्तेधृतेनवै अष्टादशमहा
द्वीपेसम्राड्भोक्ताभविष्यति ॥ ॐ ऐं ह्रीं श्रीं ऐं नमः ॥
त्रिपुरसुंदर्यै । हृदयदेवी ॥ शिरोदेवी ॥ शिखादेवी ॥ कव
चदेवी ॥ नेत्रदेवी ॥ अस्त्रदेवी ॥ कामेश्वरी ॥ भगमालिनी ॥
नित्ये ॥ क्लिन्ने भेरुंडे ॥ वह्निवासिनि । महाविद्येश्वरी ॥
शिवदूति । त्वरिते । कुलसुंदरि । नित्ये । नीलपताके
विजये । सर्वमंगले । ज्वालामालिनि । चित्रे ॥

३

3

खड्ग०

माहानित्ये। परमेश्वरि। मित्रेशमयी। षष्ठीशमयी। उड्डीश
मयी। चर्यानाथमयी। लोपामुद्रामयी। अगस्त्यमयी। का
लतापनमयी। धर्माचार्यमयी। मुक्तकेशी। ईश्वरमयी
दीपकलानाथमयी। विष्णुदेवमयी। प्रभाकरदेवमयी
कल्याणदेवमयि, तेजोदेवमयी। मनोजदेवमयी। रत्नदेवमयी। वासुदेव
मयी। श्रीरामानंदमयी॥ अणिमासिद्धे। लघिमासिद्धे
महिमासिद्धे। ईशित्वसिद्धे। वशित्वसिद्धे। प्राकाम्यसिद्धे

मुक्तिसिद्धे । इच्छासिद्धे । प्राप्तिसिद्धे । सर्वकामसिद्धे ॥ ब्रा
ह्मी । माहेश्वरि । कौमारी । वैष्णवी । वाराहि । माहेंद्री ।
चामुंडे । महालक्ष्मी ॥ सर्वसंक्षोभिणी । सर्वविद्राविणी ।
सर्वाकर्षिणी । सर्ववशंकरी । सर्वोन्मादिनी । सर्वमहांकुशे
सर्वखेचरी । सर्वबीजे । सर्वयोने । सर्वत्रिखंडे ॥ त्रैलोक्यमो
हनचक्रस्वामिनी । प्रगटयोगिनी ॥ इति प्रथमावरणं ॥ का
माकर्षिणि । बुध्याकर्षिणि । अहंकाराकर्षिणी । शब्दाकर्षि

८

५

खड्ग०

स्पर्शाकर्षणी। रूपाकर्षणि। रसाकर्षणि। गंधाकर्षणि।
चित्ताकर्षणि। धैर्याकर्षणि। स्मृत्याकर्षणि। नामाकर्ष
णि। बीजाकर्षणि। आत्माकर्षणि। अमृताकर्षणि।
शरीराकर्षणि॥ सर्वाशापरिपूरकचक्रस्वामिनि॥गुप्त
योगिनी॥ द्वितीयावर्णे॥ अनंगकुसुमे। अनंगमेखले।
अनंगमदने। अनंगमदनातुरे। अनंगरेखे। अनंगवेगिनि।
अनंगकुशे॥ अनंगमालिनि॥ सर्वसंक्षोभणचक्रस्वामिनि॥ गुप्ततरयोगिनी॥
तृतीयावर्णे

सर्वसंक्षोभिणि। सर्वविद्राविणि। सर्वाकर्षिणि। सर्वाह्ला
दिनि। सर्वसंमोहनि। सर्वस्तंभिनी।सर्वजृंभणि। सर्ववशं
करि। सर्वरंजिनि। सर्वोन्मादिनि। सर्वार्थसाधके। सर्व-
संपत्प्रपूरणि। सर्वमंत्रमयी॥ सर्वद्वंद्वक्षयकरि। सर्व-
सौभाग्यदायकचक्रस्वामिनी॥ संप्रदाययोगिनि॥ चतुर्थावलि
सर्वसिद्धिप्रदे। सर्वसंपत्प्रदे। सर्वप्रियंकरि। सर्वमंगल-
कारिणि। सर्वकामप्रदे। सर्वदुःखविमोचनि।सर्वमृत्युप्रशमनि

५

5

खड्ग०

सर्वविघ्ननिवारिणि। सर्वांगसुंदरि। सर्वसौभाग्यदायि
नी॥सर्वार्थसाधकचक्रस्वामिनी॥ कुलोत्तीर्ण योगिनी॥
॥पंचमावर्णं॥ सर्वज्ञे। सर्वशक्ते। सर्वैश्वर्यप्रदायिनि। सर्व
ज्ञानमयि। सर्वव्याधिविनाशिनी। सर्वाधारस्वरूपे। स
र्वपापहरे। सर्वानंदमयी। सर्वरक्षास्वरूपिणि॥
सर्वेप्सितफलप्रदे॥ सर्वरक्षाकर चक्रस्वामिनि॥ निगर्भ
योगिनि॥ षष्ठावर्णं॥ वशिनि। कामेश्वरि। मोहिनि।

विमले। मोदिनि। अरुणे। जयिनि। सर्वेश्वरी।
कौलिनि। सर्वरोगहरचक्रस्वामिनि॥ रहस्य
योगिनि॥ तप्तमावर्ली॥ बाणिनि। चापिनि।
अंकुशनि। पाशिनि। महाकामेश्वरि। महावज्रेश्वरि।
महाभगमालिनि। महाश्रीसुंदरी। सर्वसिद्धिप्र
दचक्रस्वामिनि॥ अतिरहस्ययोगिनि॥ अष्टमावर्ली॥
श्रीश्री महा श्री सुंदरि महाभट्टारिके सर्वानंदमय

५

6

खड्ग०

चक्रस्वामिनी। रहस्या। निरहस्ययोगिनि॥ २

त्रिपुरे। त्रिपुरेश्री। त्रिपुरसुंदरि। त्रिपुरवासि

नि। त्रिपुराश्री। त्रिपुरमालिनि। त्रिपुरसिद्धे।

त्रिपुरांबे। महात्रिपुरसुंदरी। परब्रह्मस्वरूपिणी

सर्वचक्रेश्वरि। सर्वमंत्रेश्वरी। सर्वविद्येश्वरि।

सर्ववीरेश्वरि। सर्ववागीश्वरी। सर्वयोगेश्वरी

सर्वकामेश्वरी। सर्वतत्त्वेश्वरी। सर्वजगदुत्पत्ति

सर्वसिद्धेश्वरि॥ सर्वरदेश्वरि॥

स्थितिमातृके ॥ श्रीमहामहा माहेश्वरी महामहा
राज्ञे महामहाशक्ते । महामहाज्ञप्ते महामहागुप्ते । महामहास्कंदे ॥
महामहा स्पंदे ॥ महामहायशे । महामहाश्रीचक्र
नगरसाम्राज्ञि नमस्ते नमस्ते स्वाहा ॥ ×॥
श्रीं ह्रीं ऐं ॐ ॥ परदेवतायै श्रीश्री॰नगरे
खड्गमाला समाप्ता ॥ सं०४९६४१ श्रावण प्र०२२
श्रावण शुक्ल त्रयोदश्यां सोहनु शर्मणा लिपितं
काटर मास्टर

८ मालामंत्रो महादेव्याः सर्वसिद्धिप्रदायकः एकत्रिंश
त्सहस्राणि त्रिलोके मोहनत्तमः एषा विद्या महासिद्धिदा
यिनी स्मृतिमात्रतः अग्निवातमहाक्षोभे राजोराष्ट्रस्य वि
प्लवे लुंठके तस्करभये संग्रामे सलिलप्लवे समुद्रयानवि
क्षोभे भूतप्रेतादिजे भये डाकिनीपूतनायक्षरक्षःकूष्मांड
जे भये अपस्मारग्रहव्याधिमृत्युन्मादादिजे भये मित्रभेदे
९ ग्रहभये वासनाद्यभिचारके अन्येष्वपि च दोषेषु मालामंत्रं स्म
रेद्बुधः सर्वोपद्रवनिर्मुक्तः साक्षाच्छिवमयो भवेत् आप
त्काले नित्यपूजां विस्तरात्कर्तुमक्षमः एकावर्तनमात्रेण
सर्वपूजाफलं लभेत् मालामंत्रविधानं च प्रवक्ष्याम्यनु सर्वशः

एकत्रगणनाद्रूपो मालामंत्रार्थगोचरः सर्वागमरहस्यार्थस्म
रणात्पापनाशनः सर्वसंकल्पसंसिद्धिरेतज्ज्ञात्वा नरो भवेत्
नवावरणदेवीनां ललितानां महौजसः ललितायाम्महेशान्या
मालाविद्या महीयसी नरवश्यं नरेंद्राणां वश्यं नारीवशंकरं
अणिमादिगुणैश्वर्यरंजनी पापनाशिनी यत्तदावरणस्यापि
मालामंत्रो महायशः मालावि महागुप्तापर्यायम प्रकीर्ति धा
ना शुद्धानमीनां स्वाहांता सर्वपीणांनाजपानकाः शिवमा
लापंचधा च शक्तिमाला च पंचधा हंहमाला च मातृका
एवं पंचदशा क्रमात् इति श्रीललितापरिशिष्टे उमामहे
श्वरसंवादे खड्गमालास्तोत्रराजः समाप्तम् ॥

नं. ~~२०५~~ १२४

